# अभ्यासप्रश्नपत्रम् – 2023-24

## कक्षा – एकादशी

## संस्कृतम् (केन्द्रिकम्) (कोड सं.-322)

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**अस्य प्रश्नपत्रस्य भागपञ्चकं अस्ति -**

| | | |
|---|---|---|
| **'क' भागः अपठित – अवबोधनम्** | - | **10 अङ्काः** |
| **'ख' भागः रचनात्मक कार्यम्** | - | **15 अङ्काः** |
| **'ग' भागः अनुप्रयुक्त - व्याकरणम्** | - | **20 अङ्काः** |
| **'घ' भागः** | - | **35 अङ्काः** |

**(i) पठितावबोधनम् (25 अङ्काः)**

**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः (10 अङ्काः)**

**सामान्यनिर्देशाः –**

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# 'क' भागः – अपठित-अवबोधनम्

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत –**<br>मनुष्यः एकः सामाजिकः प्राणी अस्ति। मनुष्याणां सद्व्यवहारेण एव समाजे सुखस्य शान्तेः च स्थापना भवति, सामाजिकं वातावरणं च सौहार्दपूर्णं भवति । अस्माकं वेदेषु यथोक्तम्- 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्'। अस्य मन्त्रस्य तात्पर्यमिदं वर्तते यत् समाजे सर्वे जनाः मिलित्वा गच्छन्तु, मिलित्वा एकस्वरेण वदन्तु, सर्वे परस्परं जानन्तु, सर्वत्र प्रेमपूर्णः व्यवहारः भवेत्। यजुर्वेदे कथितम् -'मित्रस्य चक्षुषा सर्वाणि मित्राणि समीक्षे' अर्थात् अहं सर्वान् जनान् मैत्रीभावेन पश्येयम् इति। कुत्रापि हिंसायाः भावना न भवेत्। केनचित् आत्मनः प्रतिकूलम् आचरणं न कर्तव्यम्। अनया भावनया पूर्णः समाज एव आदर्शसमाजः इति कथ्यते । येषां जीवने परोपकारादयः गुणाः विलसन्ति, तेषां जीवनम् एव सार्थकं जीवनम् उच्यते। | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) केन समाजे सुखस्य शान्तेः च स्थापना भवति?<br>(ii) मनुष्याणां सद्व्यवहारेण सामाजिकं वातावरणं कीदृशं भवति ?<br>(iii) परोपकारादिगुणैः पूर्णं जीवनं कीदृशं भवति ? | 1x2=2 |
| | **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कीदृशम् आचरणं न कर्तव्यम्?<br>(ii) वेदेषु सहभावनायाः कृते किम् उक्तम् ?<br>(iii) केषां जीवनं सार्थकम् उच्यते ? | 2x2=4 |
| | **(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।** | 1x1=1 |
| | **(ई) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्)**<br>(i) 'गच्छन्तु' इति क्रियापदस्य कर्तृपदं किम् ?<br>(क) मनुष्याः (ख) मनुष्यः<br>(ग) सर्वे (घ) सर्वे जनाः<br>(ii) ' आचरणं' इति पदस्य विशेषणपदं किमस्ति ?<br>(क) कर्तव्यम् (ख) प्रतिकूलम्<br>(ग) व्यवहारः (घ) अनुकूलम् | 1x3=3 |

| | | |
|---|---|---|
| | (iii) 'अहिंसा' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?<br>(क) परोपकारम् (ख) आचरणम्<br>(ग) हिंसा (घ) सात्विकम्<br><br>(iv) 'व्यवहार:' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?<br>(क) गुणः (ख) प्रेमपूर्णः<br>(ग) आचरणम् (घ) सामाजिकम् | |
| | **'ख' भागः -- रचनात्मककार्यम्** | |
| 2. | भवान् / भवती संविदा । कोलकातायां वसति ।भवतः /भवत्याः मित्रं जोसफः केरले तिरुवनन्तपुरे टेक्नोपार्क् मध्ये कार्यं करोति ।भवत्याः विवाहार्थं तं निमन्त्रयितुं लिखिते पत्रे मञ्जूषासाहाय्येन रिक्तस्थानानि पूरयत।<br><br>**(i)......................**<br>**04/01/2022**<br><br>**(ii).................** जोसफ !<br>सस्नेहं नमस्ते ।<br><br>अत्र सर्वे **(iii)..................** । भवान् अपि कुशली इति**(iv) .......................** । षष्ठकक्षायां आवयोः **(v) ...................** आरब्धा आसीत् । इदानीम् अहं पत्रमिदं मम जीवनस्य **(vi)............** दिने भवन्तं सपरिवारं निमन्त्रयितुं लिखामि। मम **(vii) ...........** निश्चितः । भवान् इव मे वरः अपि सूचना-प्रौद्योगिकी क्षेत्रे एव कार्यं **(viii)...................** । अहम् आशासे यत् भवान् **(ix)........................** सपरिवारं मम विवाहकार्यक्रमे भागं ग्रहीष्यति इति । भवतः मातापित्रोः अपि **(x)..................** मम कृते मुख्यः अस्ति । सर्वेभ्यः पुनः पुनः प्रणामाः।<br><br>भवतः अभिन्नमित्रम्<br>संविदा<br><br>**मञ्जूषा** | ½×10=5 |

| | | |
|---|---|---|
| | **करोति, निश्चयेन, प्रियमित्र, अनुग्रहः विवाहः, कोलकातातः , कुशलिनः, मैत्री, विश्वसिमि, प्रमुखे** | |
| 3. | मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत - <br> हरिश्चन्द्रः सूर्यवंशराजः । तस्य पत्न्याः नाम (i).......................। सत्यम् एव सः सदा उक्तवान् । तम् असत्यवादिनं कर्तुं बहु प्रयत्नं कृतवान् मुनिः . (ii)...................। परन्तु तस्य यत्नाः निष्फलाः आसन्। सः राजा . (iii).................... अवलम्बनार्थं बहूनि (iv)..................... अनुभूतवान् । प्रथमतः सः (v).....................कृतवान् ,यतो हि विश्वामित्रस्य दासः जातः आसीत् सः । तदनन्तरं सः स्वपत्नीत्यागम् अपि कृतवान् । तस्य सर्वं धनं नष्टम् (vi).................। अन्ते सः किं कर्म कृतवान् इति भवन्तः जानन्ति वा? श्मशाने (vii)...................... दहनं कृत्वा वेतनं गृहीतवान्। तदा एकस्मिन् समये सर्पः तस्य पुत्रं दष्टवान् । तेन सः बालः मृतः । चन्द्रमती लोहिताक्षस्य (viii) ................. श्मशानं नीतवती । तस्याः समीपे (ix)................ न आसीत् । हरिश्चन्द्रः तु (x)........................ अपि अन्त्येष्टिं कर्तुं न शक्तवान् यतः श्मशानस्य स्वामिनः सेवकः एव हरिश्चन्द्रः । इत्थं सः बहूनि कष्टानि अनुभूतवान् । परन्तु एकम् अपि असत्यं न उक्तवान् । <br><br> **मञ्जूषा-** <br> **राज्यत्यागं , स्वपुत्रस्य, विश्वामित्रः, शरीरं , चन्द्रमती** <br> **सत्यस्य , धनं, आसीत् , मृतशरीराणां , कष्टानि** | ½×10=5 |
| | | |
| 4. | अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु। <br><br> देवेशः- ऋषे ! भवान् कुत्र वसति ? <br> ऋषिः- 1 - ...........................................................................। | 1×5=5 |

| | | |
|---|---|---|
| | देवेशः - अस्तु मणिपुरतः। दिल्लीनगरं भवान् कदा आगच्छत् ?<br>ऋषिः- 2 - ............................................................ ।<br>देवेशः- अहो! अस्मिन् मासे एव परं मणिपुरं त्यक्त्वा भवान् किमर्थम् आगतवान्।<br>ऋषिः- 3 - ............................................................।<br>देवेशः- किं मणिपुरे उच्चशिक्षायाः व्यवस्था नास्ति ?<br>ऋषिः-4 - ............................................................।<br>देवेश :- सत्यमेतद् यत् दिल्लीनगरे उच्चशिक्षायाः व्यवस्था उत्तमा अस्ति । अस्तु, कल्याणकारिणी<br>भवतु दिल्ली तव कृते ।<br>ऋषिः- 5. - ............................................................।<br>देवेशः- स्वागतम्। | |
| | | |

## ‘ग’ भागः – अनुप्रयुक्तं व्याकरणम्

| | | |
|---|---|---|
| **5.** | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कुरुत - (केवलं प्रश्नत्रयम्)**<br>I. <u>**तातस्तु**</u> तदवलोक्य स्नेहपरवशः अभवत् ।<br>II. सुब्बण्णस्य सङ्गीते <u>**सहज + अभिलाषः**</u> आसीत् ।<br>III. अहो बलीय: खलु <u>**भीतोऽस्मि**</u> ।<br>IV. <u>**अचिराच्च**</u> शबरसैन्यम् अद्राक्षम् । | **1×3=3** |
| **6.** | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) दुष्यन्तः निमित्तं <u>**सूचयित्वा**</u> कथयति ।<br>(क) सूच् + त्वा (ख) सूच् + क्त्वा | **1×3=3** |

| | | |
|---|---|---|
| | (ग) सूच् +ल्यप् (घ) सूच् + त्व<br><br>(ii) तापसी बालं **<u>वि+लोक्+ल्यप्</u>** हसति ।<br><br>(क) विलोकल्य (ख) विलोक्य<br><br>(ग) विलोक्यप् (घ) विलोकल्यप्<br><br>(iii) **<u>कृता:</u>** ते तात मन्त्रिण: ।<br><br>(क) कृ+क्त (ख) कृ+क्तवतु<br><br>(ग) कृ+क्त्वा (घ) कृ+त<br><br>(iv) पटं **<u>वि+क्री+तुमुन्</u>** तन्तुवाय: प्रविशति ।<br><br>(क) विक्रेतु (ख) विक्रेतुम्<br><br>(ग) विक्रेतुमुन् (घ) विक्रेतुमु | |
| 7. | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितशब्दं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)**<br><br>(i) एषा केसरिणी ------------- लङ्घयिष्यति।<br><br>(क) त्वाम् (ख) त्वं<br><br>(ग) तव (घ) युवयोः<br><br>(ii) ---------- वयसि वर्तमानं शबरसेनापतिम् अपश्यम् । | 1×3=3 |

| | | |
|---|---|---|
| | (क) प्रथमम् (ख) प्रथमान्<br>(ग) प्रथमे (घ) प्रथमस्य<br>(iii) तस्य --------- तीरे महाजीर्ण: शाल्मली वृक्षः \|<br>(क) पश्चिमात् (ख) पश्चिमम्<br>(ग) पश्चिमेन (घ) पश्चिमे<br>(iv) राजापि तं ------------ द्वित्रिवारम् अपश्यत् ।<br>(क) बालकं (ख) बालकस्य<br>(ग) बालके (घ) बालकानाम् | |
| **8.** | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितक्रियापदं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)**<br>(i) एष: कुमार: चतुर: ------------।<br>(क) असि (ख) स्थ<br>(ग) अस्ति (घ) अस्मि<br>(ii) महाराजस्य बहु सन्तोषः --------- ।<br>(क) अभवत् (ख) अभवसि<br>(ग) अभवः (घ) अभवताम्<br>(iii) अहं किमपि न ----------।<br>(क) जानासि (ख) जानामि<br>(ग) जानीथ (घ) जानाति | **1×3=3** |

| | | |
|---|---|---|
| | (iv) यदि त्वं मयि चित्तं स्थिरं कर्तुं न --------- ।<br>(क) शक्नोषि (ख) शक्सि<br>(ग) शक्नोति (घ) शक्नुथ | |
| 9. | **समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नत्रयम्)**<br><br>I. मुनिः ------------- प्रति बालकम् आनीतवान्। (आश्रम)<br>II. यूयं निर्मितान् पटान् ---------- दत्त । (अस्मद)<br>III. ------------ समीपे सुब्बण : उपविष्टः आसीत् । (जनक)<br>IV. पूर्वावधीरितं श्रेयः -------- परिवर्तते । (दुःख) | 1x3=3 |
| 10. | **अधोलिखितवाक्येषु वाच्यानुसारं रिक्तस्थानानि पूरयत-**<br>**(केवलं प्रश्नद्वयम् )**<br>(i) एषः मया विरमयितुं न ----------- ।<br>(क) शक्ये (ख) शक्यावहे<br>(ग) शक्यते (घ) शक्नोमि<br>(ii) गौराङ्गः कशया --------- ताडयति ।<br>(क) तन्तुवायान् (ख) तन्तुवायः<br>(ग) तन्तुवायम् (घ) तन्तुवाये<br>(iii) ------------ प्रवीणतां याति ।<br>(क) मूर्खे (ख) मूर्खस्य<br>(ग) मूर्खान् (घ) मूर्खः | **1 x 2 = 2** |

| | | |
|---|---|---|
| 11. | **रेखांकितस्य अशुद्धपदस्य स्थाने प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा लिखत (केवलं प्रश्नत्रयम्)**<br>(i) सहस्राणां मूर्खाणाम् **<u>एक:</u>** पण्डितम् इच्छसि।<br>(क) एकस्मात् (ख) एकम्<br>(ग) एकस्मिन् (घ) एकस्मै<br>(ii) अनपत्यता मां **<u>वत्सलयन्ति</u>** ।<br>(क) वत्सलयति (ख) वत्सलयसि<br>(ग) वत्सलयन् (घ) वत्सलये<br>(iii) अहं ते दन्तान् **<u>गणयति</u>** ।<br>(क) गणयसि (ख) गणये<br>(ग) गणयिष्ये (घ) गणय<br>(iv) तस्मिन् **<u>वनस्य</u>** मृगयाकोलाहलध्वनिः उदचरत् ।<br>(क) वनम् (ख) वनानि<br>(ग) वनेन (घ) वने | 1x3-3 |
| | **खण्डः – घ भाग - I**<br>**पठितांशावबोधनम् 25 अङ्काः** | 5 |
| 12. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>अपरप्रभाते कृष्णः ग्रामस्य प्रतिमार्गं गत्वा जनान् अवदत् - पुष्करिण्याम् एको महान् मत्स्यो मया दृष्टः ।केचन अवदन् - अरे, त्वं मिथ्यावादी ।तव वचने को विश्वास: ? तत् क्षणं कृष्णः उक्तवान् - तदानीं मया सह मुनिः आसीत्। सोऽपि दृष्टवान् । आगच्छ ........ . तत्र पृच्छ | |

| | | |
|---|---|---|
| | ..........। मुनिं साक्षिरुपेण स्वीकृत्य ग्राम्यजनाः अपरदिने मत्स्यान्वेषणं कृतवन्तः। अन्ततः सर्वे मिलित्वा पुष्करिणीं प्रविष्टाः मत्स्यान् च धृतवन्तः किन्तु महामत्स्यस्य सन्धानं न प्राप्तम्। दिनपूर्णं ते अन्विष्टवन्तः ।सांयकाले नितरां विरक्ताः अभवन्। मुनिमुपगम्य सरोषमवदन् - किं भवानपि अस्मान् प्रतारयति ? मुनिः धीरभावेन अवदत् - अरे! महामत्स्यः किं सरलतया धर्तुं शक्यते ? तदर्थं श्रमः आवश्यकः । श्वः प्रभाते बन्धच्छेदं कृत्वा जलं निष्कासयत।<br><br>**(अ) एकपदेन उत्तरत-**<br>(क) एको महान् मत्स्य: कुत्र दृष्टः ?<br>(ख) तदानीं कृष्णेन सह कः आसीत्?<br>(ग) कस्य सन्धानं न प्राप्तम् ?<br>**(आ) पूर्णवाक्येन उत्तरत-**<br>(क) जना: मुनिमुपगम्य सरोषं किमवदन् ?<br>(ख) कृष्णः कुत्र गत्वा जनान् अवदत् ?<br>(ग) अपरदिने ग्राम्यजनाः किम् कृतवन्तः ?<br><br>**(इ) यथानिर्देशमुत्तरत -**<br>(क) 'महान् ' इतिपदस्य विशेष्यपदं किम्?<br>(ख) 'सन्ध्याकाले' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?<br>(ग) 'मुनिः धीरभावेन अवदत्' अस्मिन् वाक्ये कर्तृपदं किम् ? | <br><br><br><br><br><br>½x2=1<br><br><br><br><br>1x2=2<br><br><br><br>1x2=2 |
| | | |
| 13. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।<br>सन्निमित्तं वरं त्यागो विनाशे नियते सति।।<br>षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।<br>निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता।।<br><br>**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. दोषा: केन हातव्याः ? | 5<br><br><br><br><br><br><br>½x2=1 |

| | | |
|---|---|---|
| | ii. परार्थे धनानि जीवितं च कः उत्सृजेत् ?<br>iii. भूतिमिच्छता पुरुषेण कति दोषाः हातव्या ?<br><br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) पुरुषेण के षड्दोषाः हातव्याः ?<br>(ii) सन्निमितं त्यागः कदा वरं भवति ?<br>(iii) प्राज्ञः परार्थे किं किम् उत्सृजेत् ?<br>**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) 'प्राज्ञः धनानि जीवितं च उत्सृजेत्' अस्मिन् वाक्ये क्रियापदं किम् ?<br>(ii) 'निर्भयम्' इतिपदस्य विलोमपदं किं प्रयुक्तमत्र ?<br>(iii) 'भूतिमिच्छता पुरुषेण' अनयोः विशेषणपदं किम् ? | <br><br><br>1x2=2<br><br><br><br>1x2=2 |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>वै. गौराङ्गः - (तन्तुवायानुद्दिश्य) भो भो ! यूयं निर्मितान् पटान् मह्यं दत्त ।<br>तन्तुवायाः - न वयमयोग्यमूल्यत्वात् पटं निर्मामः ।<br>वै. गौराङ्गः- अस्तु शोभनं पटं निर्माय मह्यं दत्त, योग्यं मूल्यं भविष्यति । गृहाण इमाः मुद्राः । (इति पञ्चदशमुद्रा ददाति, ते न गृह्णन्ति, हठात्तेषां वसनं निबध्य गलहस्तेन निष्कासयति ।)<br>तन्तुवायाः - (द्वारि स्थिताः) महाराज! न वयं शतमूल्यं पटं पञ्चदशभिरेव मुद्राभिर्निर्मास्यामः ।<br>वै. गौराङ्गः - (साक्षेपम्) क इमे कोलाहलं कुर्वन्ति ? (द्वारि गत्वा सामर्षम् कशया तांस्ताडयति।) गच्छत , अपरं शोभनं पटं निर्माय समानयत (मुद्राः प्रक्षिप्य ते गच्छन्ति।)<br>वै. गौराङ्गः (अनुचरमुद्दिश्य) भो! भो! अपरांस्त्रिचतुरांस्तन्तुवायानानयत। (स निर्गत्य , चतुरस्तन्तुवायानानीय ) - महाराज! एते समागताः ।<br>वै. गौराङ्गः - (तन्तुवायानभिलक्ष्य) निर्मितान् कौशेयपटान् मह्यं दत्त ।<br>तन्तुवायाः - न वयं पटान्निर्मामः ।<br>वै. गौराङ्गः - मिथ्यैतत् । यूयं पटान्निर्माय श्रेष्ठिनां सविधे विक्रीणीध्वे । (सर्वान् कशया ताडयितुं भर्त्सयति)<br>सर्वे- न वयं निर्मामः । (इति बद्धहस्तपुटाः कम्पन्ते ।) | 5<br><br><br><br><br><br><br><br><br><br><br>½x2=1<br><br><br><br>1x2= 2 |

| | | |
|---|---|---|
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) गौराङ्गः कति मुद्राः पटस्य मूल्यरूपेण ददाति ?<br>(ख) मुद्राः प्रक्षिप्य के गच्छन्ति ?<br>(ग) अपरं किं निर्माय समानयत ?<br><br>**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) गौराङ्गः तन्तुवायान् कथं निष्कासयति ?<br>(ख) गौराङ्ग: द्वारि गत्वा किं करोति ?<br>(ग) तन्तुवाया: किमर्थं पटं न निर्मान्ति?<br><br>**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) 'न वयं निर्मामः' इत्यत्र 'वयं' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?<br>(ख) 'निर्मास्यामः' इतिक्रियापदस्य कर्तृपदं किम् ?<br>(ग) 'इमाः मुद्राः' इति अनयोः पदयोः विशेषणपदं किम् ? | 1x2=2 |
| | | |
| 15. | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –<br>**कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम् ।**<br>**पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत् ।।**<br><br>**भावार्थः** - अयि भ्रातः ! एकः पण्डितः सहस्राणां (i) ................ अपेक्षया श्रेष्ठः भवति ।मम विश्वास: अस्ति यत् त्वं मूर्खसहस्रेषु एकं (ii) ................इच्छसि। यतो हि एक: विद्वान् गभीरेषु अर्थसंकटेषु राज्यस्य अत्यधिकं (iii)............... करोति।<br><br>**मञ्जूषा**<br>**कल्याणं , पण्डितम् , मूर्खाणाम्**<br><br>**अथवा**<br>प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत- | 1x3=3<br><br><br><br><br><br><br><br><br><br><br><br>1x3=3 |

| | | |
|---|---|---|
| | **(क) सर्वथा न कश्चिन्न खलीकरोति जीवनाशा ।**<br>i. जीवनस्य आशा सर्वान् अपि दुष्टयति ।<br>ii. जीवनेच्छा सर्वं विनाशयति ।<br>iii. जीवनस्य आशा सर्वथा कञ्चिदपि जनं न खलीकरोति ।<br><br>**(ख) नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम्।**<br>i. सर्वप्राणिनां कृते किमपि अभीष्टं न अस्ति ।<br>ii. अस्मिन् संसारे सर्वेषां जन्तूनां कृते जीवितात् अधिकं प्रियं किमपि न अस्ति।<br>iii. सर्वे जन्तवः जीवनं न वाञ्छन्ति ।<br><br>**(ग) य: सर्वारम्भपरित्यागी स मे प्रिय: ।**<br>i. य: सर्वेषां कर्मणाम् आरम्भस्य त्यक्ता , स मे प्रिय: ।<br>ii. य: कर्मणाम् अधिष्ठाता स मे प्रिय: ।<br>iii. य: अकर्मणाम् सेवी स मे प्रिय: । | |
| | | |
| 16. | अधोलिखित-अन्वये रिक्तस्थानानि पूरयत –<br>**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।**<br>**अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ।।**<br><br>**अन्वय:** - धनंजय ! अथ (यदि त्वम्) (i).......... मयि स्थिरं समाधातुं न (ii)............., ततः माम् अभ्यासयोगेन (iii)............ इच्छ। | 1×3=3 |
| | | |

| | | |
|---|---|---|
| 17. | 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -<br>**'क' स्तम्भः** / **'ख' स्तम्भः**<br>क मन्त्रो विजयमूलं हि / i देहवद्भिरवाप्यते<br>ख सुसंवृतो मन्त्रिधुरैः / ii राज्ञां भवति राघव !<br>ग क्लेशोऽधिकतरस्तेषाम् । / iii अमात्यैः शास्त्रकोविदैः<br>घ अव्यक्ता हि गतिर्दुःखं / iv अव्यक्तासक्तचेतसाम् | ½×4=2 |
| 18. | अधोलिखितवाक्येषु रेखाङ्कितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं मंजूषायाः चित्वा लिखत –<br>(i) अरे, त्वं **मिथ्यावादी**।<br>(ii) किन्तु महामत्स्यस्य **सन्धानं** न प्राप्तम्।<br>(iii) **अनुपदमेव** सुब्बण्णः श्लोकम् अश्रावयत् ।<br>(iv) पुनः **स्मयपूर्वकं** राजा बालं सम्बोधयत् ।<br><br>(**मंजूषा** - हसन् , तत्क्षणमेव , अनुसन्धानम् , असत्यभाषी ) | ½×4=2 |
| | **संस्कृतसाहित्येतिहासपरिचयः** | |
| 19. | संस्कृतभाषायाः उद्भवं विकासं च अधिकृत्य प्रदत्तान् प्रश्नान् उत्तरत - (केवलं प्रश्नत्रयम् )<br>(i) विश्वस्य प्राचीनतमा भाषा का ?<br>(ii) संस्कृतभाषायाः एकम् अन्यं नाम लिखत।<br>(iii)अष्टाध्यायी इति व्याकरणग्रन्थस्य लेखकः कः ?<br>(iv)वैज्ञानिकदृष्ट्या संस्कृतं कस्य परिवारस्य भाषा अस्ति ? | 1×3=3 |

| | | |
|---|---|---|
| 20. | **वैदिकं साहित्यम् अधिकृत्य प्रदत्तवाक्येषु मञ्जूषाया: साहाय्येन रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) चत्वार: वेदा: सन्ति - ऋग्वेद: ------------ सामवेद: अथर्ववेद: च।<br>(ii) षड् -------------- सन्ति ।<br>(iii) ------------ यज्ञाय समुचितकालनिर्धारणे साहाय्यं करोति ।<br>(iv) अरण्ये भवम् इतिकारणात् -----------------।<br>मञ्जूषा - आरण्यकम्, यजुर्वेद: , ज्योतिषम् , वेदांगानि , | 1×4=4 |
| 21. | **रामायणं महाभारतं पुराणानि च अधिकृत्य 'क' भागं 'ख' भागेन सह मेलयत - (केवलं प्रश्नत्रयम् )**<br>**'क' भाग:** — **'ख' भाग:**<br>क शतसाहस्रीसंहिता — i अष्टादश अध्याया:<br>ख रामायणस्य रचयिता — ii महाभारतम्<br>ग श्रीमद्भगवद्गीता — iii महाकवि: वाल्मीकि: | 1×3=3 |